# कल्याणवृष्टि स्तवः

कल्याणवृष्टिभि रिवामृत पूरिताभिः
लक्ष्मी स्वयंवरण मङ्गल दीपिकाभिः ।
सेवाभि रम्ब तव पाद सरोज मूले
नाकारि किं मनसि भाग्यवतां जनानाम् ॥ १॥

एतावदेव जननि स्पृहणीय मास्ते
त्व द्वन्दनेषु सलिल स्थगिते च नेत्रे ।
सान्निध्य मुद्य दरुणायुत सोदरस्य
त्वद्विग्रहस्य परया सुध याप्लुतस्य ॥ २॥

ईशात्व नाम कलुषाः कति वा न सन्ति
ब्रह्मादयः प्रतिभवं प्रलयाभि भूताः ।
एकः स एव जननि स्थिर सिद्धि रास्ते
यः पादयो स्तव सकृत्प्रणतिं करोति ॥ ३॥

लब्ध्वा सकृ त्त्रिपुरसुन्दरि तावकीनं
कारुण्य कन्दलित कान्ति भरं कटाक्षम् ।
कन्दर्प कोटि सुभगा स्त्वयि भक्ति भाजः

संमोहयन्ति तरुणी र्भुवनत्रयेऽपि ॥ ४॥

ह्रींकार मेव तव नाम गृणन्ति वेदा
मात स्त्रिकोण निलये त्रिपुरे त्रिनेत्रे ।
त्वत्संस्मृतौ यमभटाभि भवं विहाय
दीव्यन्ति नन्दनवने सह लोकपालैः ॥ ५॥

हन्तुः पुरा मधिगलं परिपीयमानः
क्रूरः कथं न भविता गरलस्य वेगः ।
नाश्वासनाय यदि मातरिदं तवार्धं
देहस्य शश्व दमृताप्लुत शीतलस्य ॥ ६॥

सर्वज्ञतां सदसि वाक्पटुतां प्रसूते
देवि त्वदङ्घ्रि सरसीरुहयोः प्रणामः ।
किं च स्फुरन्मुकुट मुज्ज्वल मातपत्रं
द्वे चामरे च महतीं वसुधां ददाति ॥ ७॥

कल्पद्रुमै रभिमत प्रतिपादनेषु
कारुण्य वारिधिभि रम्ब भवत्कटाक्षैः ।
आलोकय त्रिपुरसुन्दरि मामनाथं

त्वय्येव भक्ति भरितं त्वयि बद्ध तृष्णम् ॥ ८॥

हन्ते तरेष्वपि मनांसि निधाय चान्ये
भक्तिं वहन्ति किल पामर दैवतेषु ।
त्वामेव देवि मनसा समनु स्मरामि
त्वामेव नौमि शरणं जननि त्वमेव ॥ ९॥

लक्ष्येषु सत्स्वपि कटाक्ष निरीक्षणानां
आलोकय त्रिपुरसुन्दरि मां कदाचित् ।
नूनं मया तु सदृशः करुणैक पात्रं
जातो जनिष्यति जनो न च जायते वा ॥ १०॥

ह्रींह्री मिति प्रतिदिनं जपतां तवाख्यां
किं नाम दुर्लभ मिह त्रिपुराधिवासे ।
माला किरीट मदवारण माननीया
तान्सेवते वसुमती स्वयमेव लक्ष्मीः ॥ ११॥

सम्पत्कराणि सकलेन्द्रिय नन्दनानि
साम्राज्यदान निरतानि सरोरुहाक्षि ।
त्वद्वन्दनानि दुरिता हरणोद्यतानि

मामेव मात रनिशं कलयन्तु नान्यम् ॥ १२॥

कल्पोप संहृतिषु कल्पित ताण्डवस्य
देवस्य खण्ड परशोः परभैरवस्य ।
पाशाङ्कु शैक्षव शरासन पुष्प बाणा
सा साक्षिणी विजयते तव मूर्तिरेका ॥ १३॥

लग्नं सदा भवतु मातरिदं तवार्धं
तेजः परं बहुल कुङ्कुम पङ्क शोणम् ।
भास्व त्किरीट ममृतांशु कलावतंसं
मध्ये त्रिकोण निलयं परमामृतार्द्रम् ॥ १४॥

ह्रींकार मेव तव नाम तदेव रूपं
त्वन्नाम दुर्लभ मिह त्रिपुरे गृणन्ति ।
त्वत्तेजसा परिणतं वियदादिभूतं
सौख्यं तनोति सरसीरुह सम्भवादेः ॥ १५॥

ह्रींकारत्रय सम्पुटेन महता मन्त्रेण सन्दीपितं
स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपे न्मन्त्रवित् ।
तस्य क्षोणिभुजो भवन्ति वशगा लक्ष्मीश्चिर स्थायिनी

वाणी निर्मल सूक्ति भार भरिता जागर्ति दीर्घं वयः ॥ १६॥

इति श्रीमच्छङ्कर भगवतः कृतौ कल्याणवृष्टि स्तवः सम्पूर्णः ॥